त्तरमज्ञानप्रयुक्तध्वंसस्वीकारे GuruCandr. i. 97. 16.

**अज्ञानप्रयुक्तनाश** ( ajñānaprayukta–nāśa ) *m.* destruction of what is caused by nescience अज्ञानप्रयुक्तनाशस्य प्रमात्वेन ज्ञानजन्यत्वाभावादेवाज्ञानप्रयुक्तवारणात् GuruCandr. ii. 366. 16; ज्ञानसाध्यतावच्छेदकं यदज्ञाननाशत्वमज्ञानप्रयुक्तनाशत्वं च तयोरन्यतरत्वं वा LaCandr. 175. 4.

**अज्ञानप्रयुक्तवारण** ( ajñānaprayukta–vāraṇa ) *n.* exclusion of what is caused by nescience अज्ञानप्रयुक्तनाशस्य प्रमात्वेन ज्ञानजन्यत्वाभावादेवाज्ञानप्रयुक्तवारणात् GuruCandr. ii. 366. 17.

**अज्ञानप्रयुक्तसाहित्य** ( ajñānaprayukta–sāhitya ) *n.* association with what is caused by nescience अज्ञानप्रयुक्तसाहित्यस्याज्ञाने कथनादज्ञानस्य निवृत्तिक्रियायां प्राधान्यलाभात् LaCandr. 166. 19.

**अज्ञानप्रयोज्य** ( ajñāna–prayojya ) *adj.* what is due to nescience अज्ञानप्रयोज्यस्य ज्ञानप्रयुक्ता निवृत्तिः GuruCandr. i. 99. 8.

**अज्ञानप्रवणीभूत** ( ajñāna–pravaṇībhūta ) *adj.* inclined towards ignorance अज्ञानप्रवणीभूतचेतसा मयकेदृशम् । किंवदन्तीभयात्सृष्टं कष्टं प्राप्तासि यत्सति PadmP.( Ra.) 105. 64.

**अज्ञानप्रशम** ( ajñāna–praśama ) *m.* removal of ignorance त्रिदशसंदोहाः सदाभीष्टदा अज्ञानप्रशमाय यत्र मनसो वृत्तिं समस्तां दधुः Tarkāmṛ. 1. 3.

**अज्ञानप्रसङ्ग** ( ajñāna–prasaṅga ) *m.* contingency of ignorance or nescience साधनानां फलस्य एकत्वे साध्यसाधनभेदोपदेशशास्त्रानर्थक्यप्रसङ्गः तत्कर्तुः अज्ञानप्रसङ्गो वा BṛĀraUBh. 536. 16 ( *on* iv. 3. 7 ); जडस्य स्वाज्ञाननिवृत्तिवाञ्छानुपपत्तेः जडस्याज्ञानप्रसङ्गाभावाच्च S'atDū. 172. 12.

**अज्ञानप्रसवा** ( ajñāna–prasavā ) *adj.* ( *f.* ) having an insentient thing for cause ताः ··· इदमूचिरे ···। अज्ञानप्रसवा नित्यं वल्लिका त्रिदिवौकसाम् । सर्वज्ञप्रसवे मातः कथं तव तयोपमा NemiC. 4. 12 ( comm. नास्ति ज्ञानं यस्य सः प्रसवः कारणं यस्याः सा )

**अज्ञानप्रसूतत्व** ( ajñānaprasūta–tva ) *n.* nature of being produced by nescience अनात्मनश्चाज्ञानप्रसूतत्वात् NaiṣkaSi. 104. 6.

**अज्ञानप्रहाण** ( ajñāna–prahāṇa ) *n.* abandoning of nescience तेन विनाज्ञानप्रहाणं नोपपद्यते NaiṣkaSi. 62. 2.

**अज्ञानप्राप्त** ( ajñāna–prāpta ) *adj.* happening through ignorance अज्ञानप्राप्तगोहत्याप्रायश्चित्तं तु विद्यते PadmP. iv. 31. 37.

**अज्ञानप्राप्ति** ( ajñāna–prāpti ) *f.* attainment of ( i. e. possessing ) ignorance लोकस्य च संप्रदायप्रवर्तकाभावेन कालतश्चाज्ञानप्राप्तिः TattvPrakā. 3A. 7 ( *on* i. 1. 0 )

**अज्ञानप्राबल्य** ( ajñāna–prābalya ) *n.* overpowering nature of ignorance or nescience कस्मादज्ञानप्राबल्यमिति । भक्तिज्ञानवैराग्यवासनाभावाच्च TripāMaNāU. 367. 4.

**अज्ञानफलकत्व** ( ajñānaphalaka–tva ) *n.* nature of having wrong knowledge as result तदेतद्धिंसाया अनन्तदुःखाज्ञानफलकत्वम् YogVār. 2. 34.

**अज्ञानफलत्व** ( ajñānaphala–tva ) *n.* **i** nature of having wrong knowledge as result अथमैतस्तमःसमुद्रेके सति चतुर्विधविपर्ययलक्षणस्याज्ञानस्याप्युदय इत्यज्ञानफलत्वमप्येतेषाम् TattvVai. 108. 16 ( *on* 2. 34 ); **ii** the state of not having knowledge as the result तत्रासिद्धस्तावत् ···अज्ञानफलत्वादप्रामाण्यमनुभवति NyāyMañ. ii. 159. 19.

**अज्ञानबन्धन** ( ajñāna–bandhana ) *n.* bond of ignorance गजेन्द्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबन्धनात् BhāgP. viii. 4. 6; अज्ञानबन्धनाज्जन्तुर्बुद्ध्वायं मुच्यते GaṇeP. ii. 140. 21.

**अज्ञानबहलध्वान्त** (ajñāna–bahaladhvānta) *n.* dense darkness in the form of ignorance तत्र भ्रमन्ति तेऽज्ञानबहलध्वान्तसागरे LaBhāska. 1. 3.

**अज्ञानबहुत्व** ( ajñāna–bahutva ) *n.* plurality of nescience स चाज्ञानबहुत्ववादिनां हिरण्यगर्भविराडादिभेदेन नाना SiddhāTa. 2. 14.

**अज्ञानबहुल** ( ajñāna–bahula ) *adj.* abounding in ignorance तमोबहुत्वात्ते सर्वे ह्यज्ञानबहुलाः स्मृताः VāyuP. i. 6. 40 = BrahmāṇḍP. i. 5. 37.

**अज्ञानबाधन** ( ajñāna–bādhana ) *n.* sublation by nescience अविद्याहेतुरागादीन्सम्यग्ज्ञानादनन्तरम् । यतो वीक्षामहे तस्माज्ज्ञानस्याज्ञानबाधनम् BṛĀraUBhVā. iv. 4. 880.

**अज्ञानबाहुल्य** ( ajñāna–bāhulya ) *n.* abundance of ignorance प्रत्युताज्ञानबाहुल्याद्द्वेष एव विजायते DevīBhāP. ii. 9. 18.

**अज्ञानबिम्बिता** ( ajñāna–bimbitā ) *adj.* ( *f.* ) reflected in nescience अज्ञानबिम्बिता चित्स्यान्मुखमानन्दभोजने PañcDa. 11. 72.

**अज्ञानबीज** ( ajñāna–bīja ) *adj.* with nescience as its seed ( i. e. source ) शरीरेन्द्रियमनोबुद्धिविषयवेदनासन्तानस्य अहंकारसंबन्धादज्ञानबीजस्य ··· विनिवृत्तौ ··· मोक्षसंज्ञा KenUVāBh. 92. 3 ( *on* 3. 1 ); *n.* seed ( source ) in the form of nescience अज्ञानबीजस्य विच्छेद आत्मनो मोक्षसंज्ञा KenUVāBh. 92. 5 ( *on* 3. 1 )

**अज्ञानबुद्धि** ( ajñāna–buddhi ) *adj.* ignorant-minded नैव स्वर्गगतां मर्त्याः पश्यन्त्यज्ञानबुद्धयः ( गङ्गाम् ) BrahmP. 76. 11; *f.* ignorant mind ( i. e. mind without discrimination ) तस्मादज्ञानबुद्धिं पापपङ्कलिप्तां परित्यज्य सन्मार्गगामी भव S'aṅkaVi.( Ā. ) 151. 7.

**अज्ञानबोधन** ( ajñāna–bodhana ) *n.* enlightening the ignorant प्रतिभान्त्यः स्वयं पुंसामपूर्वा ह्युपपत्तयः । भ्रान्तिं बहुमताः सत्यः कुर्युरज्ञानबोधनात् TantrVā. 81. 4 ( *on* i. 3. 2 ) ( comm. उपपत्तिरहितानां पुंसां बोधोत्पादनात् )

**अज्ञानब्रह्महत्या** ( ajñāna–brahmahatyā ) *f.* unintentional killing of a Brahmin अज्ञानब्रह्महत्या तु प्रायश्चित्तैरपोह्यते PadmP. iv. 100. 151.

**अज्ञानभान** ( ajñāna–bhāna ) *n.* apprehension of ignorance मोहभानार्थमज्ञानभानं यदि च कल्प्यते Nyāyāmṛ. 362B. 5; अस्यात्र यत् ज्ञानं तद्विरोधित्वेनाज्ञानभानमित्याशयेनोक्तमज्ञानमिति GuruCandr. ii. 374. 12 = LaCandr. 549. 42.

**अज्ञानभाव** ( ajñāna–bhāva ) *m.* **1** the state of being ignorant, ignorance राक्षसाधिपतिः ··· मौर्ख्यादज्ञानभावाच्च न्यष्ठीवदाकाशगतो महर्षेस्तस्य मूर्धनि MahāBhā. iii. 158. 54; नूनमज्ञानभावेन कर्मैतद्दारुणं मया । तत्क्षन्तव्यम् NaraP. 33. 49; अज्ञानभावादशुभाशयाद्वा कुर्वीत चेत्कोऽपि जनः खलत्वम् YaśasCam. i. 166. 1; ii. 107. 2; ii. 154. 3; तथा चाज्ञानभावेन संस्तुतोऽसि मया प्रभो BrahmP. 49. 57; दैवेनाज्ञानभावाद्वञ्चितः PrabaCin. 10. 5; पूर्वमज्ञानभावेन पापं कृतवती KathāK. 71. 6; **2** presence of nescience नन्वज्ञानभावाच्चेन्न भाति शुक्तिज्ञाने उदितेऽपि न भासेत IṣṭaSi. 64. 14; उच्यते यादृगज्ञानभावोऽभावोऽपि तादृशः IṣṭaSi. 364. 14; 83. 10; 364. 19.

**अज्ञानभावतस्** ( ajñānabhāva–tas ) *adv.* due to the presence of ignorance, unknowingly गङ्गायाम् ··सस्नुस्ताः षटल्यो( ? षट्पल्यो )ऽज्ञानभावतस् SkandP. i(2). 29. 117; तस्यैका दासिका तेन विहिता गृहिणी गृहे । अज्ञानभावतो रूक्षात्मिका सर्वाधमा च या PārśvC. 3. 449.

**अज्ञानभासक** ( ajñāna–bhāsaka ) *adj.* revealing nescience प्राज्ञत्वमस्यैकाज्ञानभासकत्वेन सम्मतम् । व्यष्टेर्निकृष्टत्वेनास्य नानेकाज्ञानभासकम् SarvaVeSāSaṁ. 322.

**अज्ञानभिन्न** ( ajñāna–bhinna ) *adj.* different from or other than nescience अज्ञानभिन्नद्वयत्वावच्छिन्नप्रतियोगिताकविरहत्वेन ··· ब्रह्मज्ञानप्रयुक्तत्वाङ्गीकारात् GuruCandr. i. 97. 17; अज्ञानभिन्नस्य ज्ञानात् सूक्ष्मरूपता नेत्यस्यास्वीकारात् LaCandr. 486. 40; 558. 37.

**अज्ञानभिन्नार्थ** ( ajñānabhinnārtha ) *adj.* object other than nescience अज्ञानभिन्नार्थो विषयः GuruCandr. ii. 402. 20.

**अज्ञानभिन्नाव्याप्ति** (ajñānabhinnāvyāpti) *f.* non-pervasion over what is different from nescience तत्कार्यस्य जीवेशभेदादेश्च ध्वंस एक इत्येकैव तदीया तेषु प्रतियोगितेति नाज्ञानभिन्नाव्याप्तिः GuruCandr. i. 96. 13.

**अज्ञानभुक्त** ( ajñāna–bhukta ) *adj.* eaten unknowingly अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता । अज्ञानभुक्तं तूत्तार्यं शोध्यं वाप्याशु शोधनैः ManuSm. 11. 160.

**अज्ञानभू** ( ajñāna–bhū ) *f.* stage of nescience कीदृश्यो भगवन्योगभूमिकाः सप्तसिद्धिदाः । ··· अज्ञानभूः सप्तपदा ज्ञभूः सप्तपदैव हि YogVā. iii. 117. 2; MahāU. 5(1)

**अज्ञानभूत** ( ajñāna–bhūta ) *n.* element ( consisting of ) nescience तथैवाज्ञानभूतेभ्यः परः क्षेत्रज्ञतां ययौ BṛĀraUBhVā. ii. 4. 417 ( comm. यत्र सर्वं कार्यं लीयते तन्मूलकारणमविद्याभूतशब्देनोच्यते )

**अज्ञानभूमि** ( ajñāna–bhūmi ) *f.* stage of nescience कल्पनामात्रनिष्पत्तेर्नापेक्षाज्ञानभूमिषु BṛĀraUBhVā. i. 4. 500; अज्ञानभूमिरिति सप्तपदा मयोक्ता YogVā. iii. 117. 29.

**अज्ञानभूमिका** ( ajñāna–bhūmikā ) *f.* stage of ignorance एताश्च सर्वा अज्ञानभूमिका इत्युच्यन्ते । एताः परस्परान्तर्भावेन सप्तैवेति वसिष्ठः SetuBa. 2. 29.

**अज्ञानभूमिग** ( ajñānabhūmi–ga ) *adj.* being in the stage of nescience अज्ञानभूमिगं वस्तु मानसंगतिमाप्नुवत् । मेयत्वं लभते BṛĀraUBhVā. iii. 4. 117.

**अज्ञानभेद** ( ajñāna–bheda ) *m.* difference in nescience अज्ञानभेदतस्तद्वन्मायाया भेदतस्तथा । जीवेश्वरविभागश्च कल्पितो माययैव तु DevīBhāP. vii. 33. 7; सद्योमुक्तिजिहीर्षया प्रतिविषयमज्ञानभेदे वा अध्यासस्याज्ञानानुपादानकत्वे वाङ्गीक्रियमाणे कल्पनागौरवाध्याससत्यत्वे प्रसज्येयाताम् VivaPraSaṁ. 24. 5; अज्ञानभेदस्वीकारेऽपि अज्ञानसत्त्वे अधिष्ठानप्रकाशानुपपत्तेः GuruCandr. i. 102. 11.

**अज्ञानभेदन** ( ajñāna–bhedana ) *adj.* which destroys ignorance वज्रसूचीं प्रवक्ष्यामि शास्त्रमज्ञानभेदनम् VajraSūU. 260. 21.

**अज्ञानम्** ( ajñānam ) *adv.* ignorantly or without knowledge वेदान्ता-